कन्दार्हः, पुं, (कन्देषु अर्हः आदरणीयः ।) सूरणः । इति राजनिर्घण्टः ॥

कन्दालुः, पुं, (कन्दमय आलुः ।) काष्ठालुः । धरणीकन्दः । विपर्णिका । इति राजनिर्घण्टः ॥

कन्दिरी, स्त्री, (कन्द + इरच् + गौरादित्वात् ङीष् ।) लज्जालुवृक्षः । इति वैद्यकम् ॥ (लज्जालुशब्दे विशेषोऽस्या ज्ञातव्यः ॥)

कन्दी, [न्] पुं, (कन्दोऽस्त्यस्य । अस्त्यर्थे इनिः ।) सूरणः । इति राजनिर्घण्टः ॥

कन्दुः, पुं स्त्री, (स्कन्दति शोषयति जलादिकं स्कन्देः सलोपश्चेत्युः ।) लौहमयपाकपात्रम् । ताओया इति लोहता इति च भाषा । तत्पर्य्यायः । स्वेदनी २ । इत्यमरः । २ । ९ । ३० ॥

कन्दुकः, पुं, (कं सुखं ददातीति । कम् + दा + मितद्र्वादित्वात् डुः संज्ञायां कन् ।) गेण्डुकः । इत्यमरः । २ । ७ । १३८ ॥ गेँड़ इति भाषा ॥ (यथा, कुमारे । १ । २९ । "सा कन्दुकैः कृत्रिमपुत्रकैश्च" ॥)

कन्दुपक्वं, क्ली, (कन्दौ पक्वम् ।) जलोपसेकं विना केवलपात्रे यत् वह्निना पक्वं भ्रष्टतण्डुलादि । यथा,—

"कन्दुपक्वानि तैलेन पायसं दधि शक्तवः ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि" ॥

इति तिथ्यादितत्त्वे कूर्म्मपुराणम् ॥

कन्दोटं, क्ली, (कदि + ओटन् ।) नीलोत्पलम् । इति शब्दरत्नावली ॥

कन्दोटः, पुं, (कदि + ओटन् ।) शुक्लोत्पलम् । इति शब्दरत्नावली ॥

कन्दोतः, पुं, (कन्दे मूले उतः । कन्द + वेञ् + क्तः ।) कुमुदम् । इति त्रिकाण्डशेषः ॥

कन्धः, पुं, (कं जलं दधाति धारयति । कं + धा + कः ।) मेघः । इति शब्दरत्नावली ॥

कन्धरः, पुं, (कं जलं धरति धारयति वा । कम् + धृ + अच् ।) मेघः । इति मेदिनी ॥ मारिषवृक्षः । इति राजनिर्घण्टः ॥ (कं शिरो धरतीति ।) ग्रीवा । इत्यमरटीकासारसुन्दरी ॥ (भागवते ६ । १२ । ३३ ।

"वज्रस्तु तत्कन्धरमाशु वेगः
कृन्तन्समन्तात् परिवर्त्तमानः" ॥)

कन्धरा, स्त्री, (कं शिरो धरतीति । कम् + धृ + अच् + टाप् ।) ग्रीवा इत्यमरः । २ । ६ । ८८ ॥ (यथा, याज्ञवल्क्यः । २ । २२३ ।

"कन्धरा बाहुसक्थ्नां च भङ्क्ते मध्यमसाहसः" ॥)

कन्धिः, स्त्री, (कं शिरः समुद्रपक्षे जलं ध्रियते यत्र । धृ + अधिकरणे + किः ।) ग्रीवा । समुद्रे पुं । इति राजनिर्घण्टः ॥

कन्नं, क्ली, (कन्यते प्राप्यते दुःखमनेन । कन गत्यां + करणे क्तः ।) पातकम् । मूर्च्छा । इति शब्दमाला ॥ कश्मलमिति च पाठः ॥

कन्यका, स्त्री, (कन्या + अज्ञातादौ कन् पूर्ब्बह्रस्वश्च ।) कुमारी । इति त्रिकाण्डशेषः ॥ यथा ।

"अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्ध्वं रजस्वला" ॥

इति स्मृतिः ॥ परकीयनायिकाविशेषः । यथा ।

"अप्रकटपरपुरुषानुरागा परकीया । सा च द्विविधा परोढ़ा कन्यका च । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गुप्तैव सकला चेष्टा" । इति रसमञ्जरी ॥

कन्यकाजातः, पुं स्त्री, (कन्यकायां अनूढ़ायां जातः । कन्यका + जन + कर्त्तरि क्तः ।) अविवाहितापुत्त्रः । तत्पर्य्यायः । कानीनः २ । इत्यमरः । २ । ६ । १३७ ॥ (यथाह याज्ञवल्क्यः । १२ । १३२ ।

"कानीनः कन्यकाजातो मातामहसुतो मतः" ॥

कर्णः । स तु अनूढायां कुन्त्यां जातः ॥)

कन्यकापतिः, पुं, (कन्यकायाः पतिः ।) जामाता । इति शब्दरत्नावली ॥

कन्यसः, पुं, (कन + अघ्न्यादित्वात् । ४ । १११ । उणां । निपातनात् कन्यः । कन्यत्वेन काम्यत्वेन सीयते अवसीयते इति । कन्य + सो + घञर्थे कः ।) कनिष्ठभ्राता । इत्यमरटीकासारसुन्दरी ॥ (यथा रामायणम् । ५ । ३३ । १० ।

"रामस्य कन्यसो भ्राता सुमित्रा येन सुप्रजाः" ॥)

कन्यसा, स्त्री, (कन्यस + टाप् ।) कनिष्ठभगिनी । इत्यमरटीका ॥

कन्या, स्त्री, (कन् दीप्तौ + अघ्न्यादित्वात् यक् इत्युणादौ ४ । १११ । कन्यायाः कनीन् चेति निर्द्देशात् पाणिनिमतानुसारेण न ङीष् अतष्टाप् ।) कुमारी । इत्यमरः ॥ २ । ६ । ८ । सा तु दशमवर्षीया । इति स्मृतिः ॥ (यथा महाभारते वनपर्व्वणि ।

"यस्मात् कामयते सर्व्वान् कमेर्धातोश्च भाविनि ! ।
तस्मात् कन्येह सुश्रोणि ! स्वतन्त्रा वरवर्णिनि !" ॥)

नारी । ओषधीविशेषः । घृतकुमारी इति ख्याता । इति मेदिनी ॥ यथा सुश्रुते निदानस्थाने ॥

("कान्तैर्द्वादशभिः पत्रैर्मयूराङ्गरुहोपमैः ।
कन्दजा काञ्चनक्षीरी कन्या नाम महौषधी" ॥
"शोथघ्नी कासहा कन्या" ॥ इति वैद्यकद्रव्यगुणः ॥ विशेषगुणादयोऽस्या घृतकुमारीशब्दे द्रष्टव्याः ॥) स्थूलैला । वाराहीकन्दः । वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥ • ॥ मेषादिद्वादशराश्यन्तर्गतषष्ठराशिः । सा तु उत्तरफल्गुनीशेषपादत्रयहस्तासमुदायचित्राप्रथमार्द्धेन भवति । तदधिष्ठातृदेवतायाः स्वरूपं यथा । जले नौकास्थशस्याग्निधारिणी स्त्री । इति दीपिका ॥ अपि च । नीलकण्ठीजातके ॥

"पाण्डुर्द्विपात् स्त्रीदितनुर्यमाशा-
निशामरूक्षोतसमोदयश्चा ।
कन्यार्द्धशब्दा शुभभूमिवैश्य-
रूक्षाल्पसङ्गप्रसवा शुभा च" ॥ * ॥

मतान्तरे सा तु शीर्षोदया । दिनबला । पिङ्गलवर्णा । दक्षिणदिक्स्वामिनी । वायुप्रकृतिः । शीतलस्वभावा । शुद्धभूमिचरा । वैश्यवर्णा । रूक्षा । सुधाङ्गा । खटच्छब्दा । अल्पसन्ताना । अल्पपुंसङ्गा च ॥ * ॥ तत्र जातफलम् । "वेदशास्त्रे श्रद्धावान् स्नानरोषे खेदितः भार्य्यायां सदा विरसश्च" । इति ज्योतिषम् ॥ * ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् । यथा कोष्ठीप्रदीपः ॥

"युवतिगे शशिनि प्रमदाजन-
प्रबलकेलिविलासकुतूहलैः ।
विमलशीलयुता जननोत्सवैः
सुविधिना विधिना सहितः पुमान्" ॥ * ॥

तस्या उदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं दशदण्डकलाधिकपञ्चाङ्गुलप्रभे देशे वर्त्तमानोनविंशायनांशे ऊनत्रिंशत्पलाधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ * ॥ तत्र जातफलम् ।

"कन्याजन्मोद्भवो मर्त्यो नानाशास्त्रविशारदः ।
सौभाग्यगुणसम्पन्नः सुन्दरः सुरतप्रियः" ॥

इति कोष्ठीप्रदीपः ॥ * ॥ सुता । तस्या विवाहं विनान्यसंस्कारकर्म्मणि वृद्धिश्राद्धनिषेधो यथा,—

"कन्याया निष्क्रमो नास्ति वृद्धिश्राद्धं न विद्यते ।
नामान्नप्राशनं चूड़ां कुर्य्यात् स्त्रीणाममन्त्रकम्" ॥
"जातकर्म्मादिचूड़ान्तं कुमार्य्यास्त्वप्यमन्त्रकम् ।
कर्त्तव्यं पञ्चभिर्व्वर्षैरेकं निष्क्रमणं विना" ॥

इति च महानिर्व्वाणतन्त्रे नवमोल्लासः ॥ (तीर्थविशेषः । यथा महाभारते ३ । ८३ । १०४ ।

"ततो गच्छेत धर्म्मज्ञ ! कन्यातीर्थमनुत्तमम् ।
कन्यातीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्" ॥)

कन्याका, स्त्री, (कन्यैव इति स्वार्थे कन् अनुक्तपुंस्कत्वात् न ह्रस्वः ।) कुमारी । इति शब्दरत्नावली ॥

कन्याकुब्जः, पुं, (कन्याः कुब्जाः यत्र देशे सः । वायुना हि अस्मिन् देशे कन्याः कुब्जीकृता अतोऽस्य तथात्वम् ।) कान्यकुब्जदेशः । इति हेमचन्द्रः ॥ (यथा, महाभारते । वनपर्व्वणि ॥

"कन्याकुब्जेऽपिबत्सोममिन्द्रेण सह कौशिकः" ॥

वायुना हि अस्मिन् देशे पुरा कन्याः कुब्जीकृताः । तद्विवरणमुच्यते । पुरा किल कुशनाभो राजर्षिर्घृताच्यां कन्याशतं जनयामास । रूपयौवनसम्पन्नास्तास्तु कदाचित् उद्यानभूमिमागम्य परमानन्दसन्तत्या विक्रीड़ुः । अथ सर्व्वगो वायुस्तास्सर्व्वा अवलोक्य कामशरपीड़ितोऽब्रवीत् । अहं वः कामये, भवत्यो मे भार्य्या भवन्तु । अथ ता अङ्गनास्तस्य तद्वचनं श्रुत्वा उच्चैर्विहस्य तमब्रुवन् भो वायो ! त्वं भूतानां अन्तश्चरसि तत्कथमस्माकं मनोभावं न वेत्सि । वयं किल कुशनाभसुताः कथं पितरं कामतः समतिक्रम्य स्वयं वरमभिलषामः । पिता हि अस्मान् यस्मै दास्यति स नो भर्त्ता भविष्यतीति । अतः क्षन्तव्याः खलु भवन्नियोगं कर्त्तुमशक्ता वयम् । वायुस्तु तासामेतद्वचनमाकर्ण्य कोपसमन्वितः स्वतेजसा तासां शरीरेषु प्रविश्य मध्ये बभञ्ज । ततः प्रभृति देशोऽयं कन्याकुब्ज इत्येव ख्यातः ॥ अस्य विस्तृतिस्तु रामायणे आदिकाण्डे ३५ अध्याये द्रष्टव्या ।

अयन्तु काशीनदीतटे स्थितः । अधुना कुशस्थल इत्याख्यया प्रसिद्धः । इति कनिङ्हामेनोक्तम् ॥ अस्य समीपे जाह्नवीप्रवहमाना वर्त्तते । इति महाभारते अनुशासनपर्व्व ॥)

कन्याटः, पुं, (कन्या अटति अत्र । कन्या + अट् + अधिकरणे घञ् ।) वासगृहम् । इति त्रिकाण्डशेषः ॥